|| শ্রী বিষ্ণুস্তুতিঃ ||

শ্রীমধ্বসংসেবিতপাদপদ্মং
রুদ্রাদিদেবৈঃপরিসেব্যমানম |
ঋষ্যাদিভির্বেদপথৈঃ সুগেয়ং
কথং নু পশ্যেয়মমোঘবীর্যম || ১ ||

হৃন্মংদিরে সুংদররত্নপীঠে
লক্ষ্ম্যাত্মকে সারতরে নিবিষ্টম |
শ্রীভূসমাশ্লিষ্টতনুং তথাঽপি
পূর্ণং নিজানংদময়ং পরেশম || ২ ||

অনংতপূর্ণেংদুকিরীটশোভিতং
সুনীলস্নিগ্ধালকশোভিসন্মুখম |
প্রত্যগ্রকংজায়তলোললোচনং
সুচংপকাকোরকনাসিকায়ুতম || ৩ ||

প্রবালমধ্যার্পিতকুংদকোরকং
স্ফুরৎকপোলদ্যুতিদীপ্তকুংডলম |
কেয়ূরভূষায়ুতবাহুদংডকং
সুচক্রশংখাব্জগদাবিরাজিতম || ৪ ||

গ্রৈবেয়রত্নাভরণাদিভূষিতং
সৎকৌস্তুভাবেষ্টিতকংবুকংধরম |

সুবর্ণসূত্রাংচিতসুংদরোরসং
বিচিত্রপীতাংবরধারিণং প্রভুম ॥ ৫ ॥

করিরাজকরোপমোরুযুগ্মং
প্রিয়য়া সেবিতজংঘয়া সমেতম।
বরকূর্মপ্রপদেন শোভমানং
হ্যনভিব্যক্তসুগুল্ফপাদযুগ্মম ॥ ৬ ॥

নখরাজিসুপূর্ণচংদ্রকাংত্যা
নুতিমজ্জনতাপহারিণং রমেশম।
নিজপূর্ণসুবোধবিগ্রহং
পরমানংদপরাত্মদৈবতম ॥ ৭ ॥

॥ ইতি শ্রীবিষ্ণুস্তুতিঃ ॥